तमिष्यन्-न्ती-ती, तमयिष्यन्-न्ती-ती, तितमिषिष्यन्-न्ती-ती ;
— तमयमानः, तमयिष्यमाणः, तन्तम्यमानः, तन्तमिष्यमाणः ;
[1]प्रतान्-प्रतामौ-प्रतामः ; — — —
[2]तान्तः, तमितः, तितमिषितः, तन्तमितः-तवान् ; —
तमः, [A]तमी[3], तमः, तितमिषुः, तन्तमः ;
तमितव्यम्, तमयितव्यम्, तितमिषितव्यम्, तन्तमितव्यम् ;
तमनीयम्, तमनीयम्, तितमिषणीयम्, तन्तमनीयम् ;
[4]तम्यम्, तम्यम्, तितमिष्यम्, तन्तम्यम् ;
ईषत्तमः-दुस्तमः-सुतमः ; — — —
तम्यमानः, तम्यमानः, तितमिष्यमाणः, तन्तम्यमानः,
तमः, तमः, तितमिषः, तन्तमः ;
तमितुम्, तमयितुम्, तितमिषितुम्, तन्तमितुम् ;
[5]तान्तिः, तमना, तितमिषा, तन्तमा ;
तमनम्, तमनम्, तितमिषणम्, तन्तमनम् ;
[6]तमित्वा-तान्त्वा, तमयित्वा, तितमिषित्वा, तन्तमित्वा ;
प्रतम्य, [7]प्रतमय्य, प्रतितमिष्य, प्रतन्तम्य ;

---

1. क्विपि, 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घे, 'मो नो धातोः' (8-2-64) इति नकारः पदान्ते। तस्य नकारस्य त्रैपादिकत्वात् 'न लोपः प्रातिपदिकान्तस्य' (8-2-7) इति लोपो न।
2. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः। 'अनुनासिकस्य क्वि—' (6-4-15) इति दीर्घः। 'मोऽनुस्वारः' (8-3-23) इत्यनुस्वारः। 'अनुस्वारस्ययि—' (8-4-58) इति परसवर्णः।
3. 'शमित्यष्टाभ्यो घिनुण्' (3-2-141) इति तच्छीलादिषु कर्तृषु घिनुण्। 'नोदात्तोपदेशस्य—' (7-3-34) इति वृद्धिनिषेधः।
4. 'पोरदुपधात्' (3-1-93) इति यत्।
5. 'तितुत्र—' (7-2 9. इतीण्णिषेधः। अनुस्वारपरसवर्णौ।
6. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इडभावपक्षे, दीर्घानुस्वारपरसवर्णाः।
7. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।

A. 'अशाम्यदात्माऽपि तमी नमामि दमिप्रियं श्रान्तिहरं भवन्तम्।' धा. का. 2.65.